प्रश्न पत्र–प्रारुप – II

संस्कृतम्

समय : होरात्रयम् दशमी कक्षा पूर्णांक : ४०

Time : 3 Hours

सामान्य निर्देशा :

(i) अस्मिन् प्रश्न पत्रे चत्वारः खण्डाःसन्ति।
(इस प्रश्न पत्र में चार खण्ड हैं ।)

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(प्रत्येक खण्ड का उत्तर एक ही स्थान में क्रम से लिखना है।)

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखनीयानि ।
(सभी प्रश्नों का उत्तर संस्कृत में ही लिखना है । )

**खण्डः 'क' अपठित–अवबोधनम्** १०

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत–
(निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों का उत्तर संस्कृत में लिखें ।)

एकदा केचन शिष्याः भिक्षाटनं कुर्वन्ति स्म । तदैव एकः गजः महता वेगेन तस्मिन् मार्गे आगच्छत् । गजस्य उपरि उपविष्टः हस्तिपकः उच्चस्वरेण पुनः घोषयति स्म–अपसरन्तु अपसरन्तु इति। सर्वे शिष्याः धावितवन्तः । यथा सर्वेषु वस्तुषु ईश्वरः अस्ति तथा गजे अपि अस्ति इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान् । तावति काले गजः तं स्वशुण्डया गृहीत्वा दूरे क्षिप्तवान् । शिष्याः तं मूर्च्छितं गुरुकुलम् अनयन् । लब्धसंज्ञं तं गुरु : अपृच्छत्–वत्स ! त्वम् एवं कथम् आचरः इति । शिष्यः अवदत्–गुरुवर्य, भवन्दिः एव शिक्षितं यत् ईश्वरः सर्वेषु अस्ति अतः अहं गजे अपि ईश्वरं मत्वा तत्र अतिष्ठम् इति । गुरुः उक्तवान्–वत्स । यथा गजे ईश्वरः अस्ति तथा हस्तिपके अपि ईश्वरः इति कथं न चिन्तितम् ।

I. एकपदेन उत्तरत – (एक पद में उत्तर दें ।) 1×2 = 2

(i) गजः कं स्वशुण्डया गृहीत्वा क्षिप्रवान् ?

(ii) 'अपसरन्तु अपसरन्तु' इति कः घोषयति स्म ?

II. पूर्णवाक्येन उत्तरत – (पूर्ण वाक्य में उत्तर दें ।) 2×2 = 4

(i) एकः शिष्यः किं विचिन्त्य तत्रैव स्थितवान् ?

(ii) गुरोः प्रश्नस्य उत्तरं शिष्येण केन प्रकारेण दीयते ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– $\frac{1}{2} \times 4 = 2$
(दिए गए विकल्पों में से उचित उत्तर चुनकर लिखें ।)

(क) 'वेगेन' इति पदस्य किं विशेषणपदम् ?
(I) केचन (II) महता (III) उपरि (IV) मत्वा

(ख) 'अपसरन्तु' इति क्रियापदस्य कर्तृपदं किम् ?
(I) शिष्याः (II) गुरुः (III) हस्तिपकः (IV) ईश्वरः

(ग) 'अनयन्' इति पदे कः लकारः प्रयुक्तः ?
(I) विधिलिंगः (II) लट् (III) लङ् (IV) लोट्

(घ) 'तत्रैव' इति पदस्य सन्धि–विच्छेदं कुरुत ।
(I) तत्र+ऐव (II) तत्+एव (III) तदा+एव (IV) तत्र+एव

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत – 2
(इस अनुच्छेद के लिए उचित शीर्षक लिखें ।)

## खण्ड : 'ख' (रचनात्मकं कार्यम्)

2. पत्रलेखनम् –

विकासः नैनीतालस्य एकस्मिन् विद्यालये पठति । सः छात्रावासात् अमेरिका–वास्तव्यं मित्रं जोसेफं नैनीतालविषये एकं पत्रं लिखति । मञ्जूषातः पदानि चित्वा पत्रे रिक्तस्थानानि पूरयत– (विकास नैनीताल के एक विद्यालय में पढ़ता है । वह छात्रावास से अमेरिका में रहनेवाले मित्र जोसेफ को नैनीताल के बारे में एक पत्र लिखता है । मंजूषा से पद चुनकर पत्र में रिक्त स्थानों की पूर्ति करें ।) $\frac{1}{2} \times 10 = 5$

प्रिय ...........(ii)...........जोसेफ

शिवाजी छात्रावासः

.................(iii)...........!

...........(i)............

दिनांकः 24.01.2019

गतमासे आवयोः दूरभाषेण वार्तालापः अभवत् । ........(iv)....... एव अत्र हिमपातः अभवत् । तं द्रष्टुं बहवः यात्रिणः दूरतः आगताः आसन् । नैनीसरः एकं विशेषं रमणीयं, सुन्दरम् आकर्षणस्थलम् अस्ति, तस्य जलम् अपि ............(v)...........आसीत् । तदा नौका विहारः तु सम्भवः नासीत् किन्तु ...........(vi)...........आनन्दिताः आसन् । भयंकरे शीते अपि यात्रिणः 'चाइनापीक' इति स्थानं द्रष्टुम् आगताः आसन्ट । अत्रत्यानि प्राकृतिक दृश्यानि आकर्षकाणि मनोरमानि च सन्ति । यात्रिणां समूहं ..........(vii).......स्थानीयाः आपणिकाः प्रमुदिताः आसन् । विश्रामागारेषु आवासः दुर्लभः अभवत् । निवासाय .............(viii)............ भवान् अपि भारते आगच्छत् पर्वतीय स्थलस्य च आनन्दं .............(ix).... ......... ।

..........(x).......मित्रम्

विकासः

मञ्जूषा – (दृष्ट्वा, भवताम्, हिमीभूतम्, नमोः नमः, मित्र, नैनीतालम्, अनुभवेत्, दिनद्वयानन्तरम्, प्रकोष्ठानां, स्केटिंगप्रेमिणः,

3. अधोदत्तं चित्रं दृष्ट्वा संस्कृतेन पञ्चवाक्यानि मंजूषा पद सहायतया लिखत नीचे दिये गए चित्र को देखकर संस्कृत में पाँच वाक्य मंजूषा के पदों की सहायता से लिखें



मंजूषा–पुष्पोद्यानम्, बालक, बालिका, वृक्षाः, पक्षिणः, आकाशे, पादपेषु, क्रीडन्ति, पुष्पाणि, लतासु, प्रमुदिताः उपनेत्रे)

अथवा

मञ्जूषाप्रदत्तशब्दानां सहायतयां 'जन्तुशाला' विषयम् अधिकृत्य पञ्चवाक्येषु एकम् अनुच्छेदं संस्कृतेन लिखत–मञ्जूषा में दिए गए पदों की सहायता से 'जन्तुशाला' विषय पर पाँच संस्कृत वाक्यों में एक अनुच्छेद लिखें ।)

मञ्जूषा–वानराः, मृगाः, भल्लूकाः, दर्शकाः, प्रमुदिताः, शाखासु, भ्रमन्ति, पक्षिणः, शिशवः, सम्मर्दः, भयातुराः)

## खण्ड : 'ग' (अनुप्रयुक्तण्याकरणम्) 25

4. अधोलिखितवाक्येषु रेखांकितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत– (निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि या सन्धि–विच्छेद कर लिखें । ) 1×4 = 4

(I) मम नाम **देवेन्द्रः** अस्ति।

(II) धनस्य महत्वं **यत्+अवसरे** दीयते

(III) **मातुर्वचनम्** सदैव पालनीयम् ।

(IV) सर्वे जनाः **जगत्+नाथं** नमन्ति ।

5. अधोलिखितेषु वाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेम्यः चित्वा लिखत – (निम्नलिखित वाक्यों में रेखांकित पदों का समास या विग्रह दिए गए विकल्पों में से चुनकर लिखें ।) 1×4 = 4

(क) तस्य चक्षुषी **नीलोत्पलम्** इव स्तः ।

(i) नीलम् उत्पलम् (ii) नीलः उत्पलः

(iii) नील इव उत्पलम् (iv) नीलोत् पलम्

(ख) **रामलक्ष्मणौ** भ्रातरौ आस्ताम् ।

(i) राम–लक्ष्मण (ii) रामश्च लक्ष्मणश्च

(iii) रामश्च लक्ष्मण च (iv) राम च लक्ष्मण च

(ग) **महान् कवि**ः कालिदासस्य अभिज्ञानशाकुन्तलं पठ ।

(i) महत्कविः (ii) कविशिरोमणिः

(iii) कविराजः (iv) महाकवि :

(घ) **शक्तिम् अनतिक्रम्य** कार्यं साधय ।

(i) शक्तिपूर्वकम् (ii) सशक्तिम्

(iii) यथाशक्तिः (iv) यथाशक्तिम्

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां प्रकृति–प्रत्ययौ संयोज्य वियोज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत– (निम्नलिखित वाक्यों में रेखांकित पदों का प्रकृति–प्रत्यय जोड़कर या पृथक् कर उचित उत्तर विकल्पों में से चुनकर लिखें।) 1×4 = 4

(क) अजा तृणं चरति ।

(i) अज+ङीप् (ii) अज+टाप् (iii) अज+डाप् (iv) अज+चाप्

(ख) अस्माभिः रामायणम् अवश्यमेव **पठ्+अनीयर्** ।

(i) पठनीयम् (ii) पठनीयः (iii) पठनीया

(ग) सभायां तस्य **मूर्खता** प्रकटिता ।

(i) मूर्ख+त्व (ii) मूर्ख+तृच् (iii) मूर्ख+तल्

(घ) छात्राः **क्रीड्+तुमुन्** क्रीडा–क्षेत्रम् अगच्छन् ।

(i) क्रीडित्वा (ii) क्रीडितुम् (iii) क्रीडितण्यः ।

7. अधोलिखितं संवादं मञ्जूषायां दत्तैः पदैः वाच्यपरिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत– (निम्नलिखित संवाद को मञ्जूषा में दिए गए पदों से वाच्य–परिवर्तन कर पूरा करके पुनः लिखें।) 1×3 = 3

रमा–उमे ! पश्य, गृहे माता किं पचति ?

उमा–रमे ! .............(i)..............ओदनं पच्यते ।

रमा–उमे ! मोहनः अधुना कुत्र खेलति ?

उमा–रमे ! .............(ii)...........अधुना उद्याने खेल्यते ।

रमा–उमे ! मालाकारः पुष्पवाटिकायां किं सिञ्चति ?

उमा–रमे ! मालाकारेण उद्याने केतकीपुष्पं .............(iii)...........।

मञ्जूषा (मोहनेन, सिञ्चयते, मात्रा)

8. अधोलिखित दिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूर्यन्ताम्– (निम्नलिखित दिनचर्या में रिक्त स्थानों को समयबोधक शब्दों से पूरा करें।) 1×2 = 2

(i) एकः छात्रः प्रातः ............(5.30) वादने उतिष्ठति ।

(ii) सः प्रतिदिनं पूर्वाह्ने ............(8.45) वादने विद्यालयं गच्छति ।

9. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अण्ययपदैः पूरयित्वा लिखत– (निम्नलिखित वाक्यों में रिक्त स्थानों को मंजूषा में दिए गए उचित अण्यय पदों से पूरा करें।) 1×4 = 4

(I) त्वं ................असत्यं वदसि ।

(II) ..................सुदर्शनो नाम भूपतिः आसीत् ।

(III) सः नगरात् .................गतः ।

(IV) धनात् ..............जीवने सुखं नास्ति ।

मञ्जूषा – (बहिः, विना, पुरा, सदा)

10. अधोलिखितेषु वाक्येषु रेखांकितपदम् अशुद्धम् अस्ति/अशुद्धपदम् संशोध्य लिखत – (निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है। अशुद्ध पद को संशोधित कर लिखें ।) 1×4 = 4

(I) **भवन्तः** कुत्र गच्छथ ?

(II) विद्वान् सर्वत्र **पूज्यते** ।

(II) **एततः** मम पुस्तकम् अस्ति ।

(IV) नृपः **निर्धनान्** अन्नं यच्छति ।

## खण्ड : 'घ' (पठित–अवबोधनम्) 30

11. अधोलिखितं गद्यांशं श्लोकं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् उत्तराणि संस्कृतेन लिखत – (निम्नलिखित गद्यांश, श्लोक और नाट्यांश को पढ़कर दिए गए प्रश्नों का उत्तर संस्कृत में लिखें।)

(अ) गद्यांशः

अथ राजानं मुनिरुवाच– "मन्ये भवदीयस्य प्रश्नत्रयस्य समाधानमस्य जनस्य परिवर्तित मानसस्य सेवया एव जातम्। मुनिः पुनरपि विशदीकुर्वन्नकथयत्–अयमेव श्रेष्ठः समयः यत्र मानवः परोपकारे कस्मिन्नपि कर्मणि व व्यापृतः। समक्षं वर्तमानः पुरुषः एव श्रेष्ठः कस्यापि सहायतां कामयमानः । सेवैव श्रेष्ठं कर्म येन हृदयपरिवर्तनमपि जायते।" राजा मुनेरुत्तरप्रदानपद्धत्या प्रमुदितः भूत्वा स्वनगरं गतः ।

I. एकपदेन उत्तरत – (एक पद में उत्तर दें ।) 1×2 = 2

(i) अथ कः राजानम् उवाच ?

(ii) राजा प्रमुदितः भूत्वा कुत्र गतः ?

II. पूर्णवाक्येन उत्तरत– (पूर्ण वाक्य में उत्तर दें ।) 2

कः पुरुषः श्रेष्ठः असित ?

III. प्रदत्तविकल्पेभयः उचितम् उत्तरं चित्वा लिखत । (दिए गए विकल्पों में से उचित उत्तर चुनकर लिखें ।)

(क) 'भूत्वा' इति पदे कः प्रत्ययः प्रयुक्त ?

(I) क्त्वा (II) तुमुन् (III) तण्यत्

(ख) 'श्रेष्ठः समयः' अनयोः पदयोः 'समयः' किम् अस्ति ?

(I) विशेषणपदम् (II) विशेष्यपदम् (III) प्रविशेषणम्

(ग) 'परिवर्तमानः' इत्यस्मिन् पदे कः उपसर्गः ?

(I) परिवृत (II) परा (III) परि

(घ) 'सेवैव' इत्यस्य पदस्य सन्धि–विच्छेदं लिखत –

(I) सेवा + एव (II) सेवा+इव (III) सेवा+ऐव

(अ) श्लोक :

रात्रौ जानुर्दिवा भानुः कृशानुः सन्ध्ययोर्द्वयोः ।
इत्थं शीतं मया नीतं जानुभानुकृशानुभिः ।।

I. एकपदेन उत्तरत – (एक पद में उत्तर दें ।) $1 \times 2 = 2$

(i) रात्रौ केन शीतं नीतम् ?

(ii) भानुः कदा शीतम् अपहरति ?

II. पूर्णवाक्येन उत्तरत – (पूर्ण वाक्य में उत्तर दें) 2

कैः प्रकारैः शीतं नीतम् ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – $\frac{1}{2} \times 4 = 2$
(दिए गए विकल्पों में से उचित उत्तर चुनकर लिखें ।)

(क) 'रात्रौ' इति पदे का विभक्तिः ?

(I) तृतीया (II) पंचमी (III) सप्तमी

(ख) 'सूर्यस्य' पर्यायः कः शब्दः श्लोके अस्मिन् प्रयुक्तः ?

(I) कृशानुः (II) भानुः (III) जानुः

(ग) 'मया' इति पदे प्रातिपदिकं लिखत ?

(I) अस्मद् (II) तत् (III) युष्मद्

(घ) 'जानुर्दिवा' इति पदस्य समास विग्रहं कुरुत ।

(I) जानोः दिवा (II) जानुःच दिवा च (III) जानुः च दिवा

(इ) नाट्यांशः

विदूषकः– (जनान्तिकम्) अहं पुनः पृच्छामि । (प्रकाशम्) किं नामधेया युवयोः जननी ?
लवः – तस्याः द्वे नामनी ।
विदूषकः– कथमिव ?
लव : – तपोवनवासिनो देवीति नाम्ना आह्वयन्ति भगवान् वाल्मीकिर्वधूरिति ।
रामः– अपि च इतस्तावद् वयस्य ! मुहूर्त्तमात्रम् ।
विदूषकः– (उपसृत्य) आज्ञापयतु भवान् ।
रामः– अपि कुमारयोरनयोरस्माकं च सर्वथा समरुपः कुटुम्बवृतान्तः ? (नेपथ्ये) इयती वेला सञ्जाता रामायणगानस्य नियोगः किमर्थं न विधीयते ?
उभौ – राजन् ! उपाध्यायदूतोऽस्मान् त्वरयति ।
रामः – मयापि सम्माननीय एव मुनिनियोग : ।

I. एकपदेन उत्तरत – (एक पद में उत्तर दें ।) $1 \times 2 = 2$

(i) कुमारयोः रामस्य च किं समरुपः आसीत् ?

(ii) मुनिनियोगः केन सम्माननीयः कथितः ?

II. पूर्णवाक्येन उत्तरत– (पूर्ण वाक्य में उत्तर दें ।) 2

कुमारः लव स्वमातुः द्वे नामनी कथम् उक्तवान् ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – (दिए गए विकल्पों में से उचित उत्तर चुनकर लिखें ।) $\frac{1}{2}\times4=2$

(क) (जनान्तिकम्) 'अहं पुनः पृच्छामि।' अत्र कर्तृपदं किम् ?

(i) पुनः (ii) अहम् (iii) पृच्छामि

(ख) 'कुटुम्बवृतान्तः' इति पदस्य समास–भेदं लिखत ।

(i) अव्ययीभावः (ii) द्विगुः (iii) तत्पुरुषः

(ग) 'विधीयते' इत्यस्मिन् पदे कः लकारः प्रयुक्तः ?

(i) लृट् (ii) लट् (iii) लङ्

(घ) 'राक्षसी' इति पदस्य विलोमपदं अवचित्य लिखत ।

(I) देवी (II) वयस्य (III) मुनिः

12. रेखांकितपदमाधृत्य प्रश्न–निर्माणं कुरुत – (रेखांकित पदो ंके आधार पर प्रश्न–निर्माण करें ।) 1×4 = 4

(i) <u>**अरयः**</u> व्यायामिनं अर्दयन्ति ।

(ii) सा कन्या <u>**अतिथिं**</u> स्नानाय प्रेरितवती ।

(iii) <u>**तृणानाम्**</u> अग्निना सह विरोधो न भवति ।

(iv) तत्र <u>**राजसिंहः**</u> नाम राजपुत्रः प्रतिवसति स्म ।

13. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोक द्वयस्य अन्वयं पूरयत – (मञ्जूषा से उचित पद चुनकर निम्नलिखित दोनों श्लोकों का अन्वय पूरा करें ।) $\frac{1}{2}\times8=4$

(अ) विचित्रे खलु संसारे नास्ति किंचित् निरर्थकम् ।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः ।।
अन्वयः–

विचित्रे ........(i)...........खलु किंचित् .........(ii)........... नास्ति अश्वः चेत् ...........(iii) ...........वीरः (तर्हि) भारस्य वहने ...............(iv) ...............(वीरः) अस्ति ।

(अ) व्यायमो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम् ।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ।।
अन्वयः–

व्यायामः हि........(i)........... स्निग्धभोजिनाम् .........(ii)........... च पथ्यः अस्ति । स च ...........(iii) ........... (जनानां) शीते वसन्ते च ...............(iv) ...............स्मृतः ।

मञ्जूषा

(निरर्थकम्, सदा, संसारे, तेषाम्, खरः बलिनां, धावने, पथ्यतमः)

14. अधोलिखितकथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत – (निम्नलिखित कथनों का उचित भाव विकल्पों में से चुनकर लिखें।) 1×4 = 4

(क) किं गृहिणः प्रियहिताय दारगुणाः ।

(i)प्रियतमा भार्या (ii)भार्या गुणवती भवेत् (iii)दारा मितव्ययी भवति

(ख) दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम् ।

(i)प्रकृतिः सुखदा अस्ति (ii)जीवनयथार्थम् (iii)संकटापन्नं जीवनम्

(ग) सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।

(i)वृक्षाः कर्त्तनीया (ii)वृक्षाः फलच्छायां ददति (iii)वृक्षाः रोपणीयाः

(घ) समीक्ष्य कुर्यात् व्यायामन्यथा रोगमाप्नुयात् ।

(i)स्वास्थ्यः एव धनम् (ii)व्यायामः लाभप्रदः (iii)व्यायामः हानिकारकः